विजयाभिनन्दनादयस्तथो भविष्यन्ति। तथा हि कलौ षट् शककर्त्तारः तल्लक्षणादि ज्योतिर्वि० १०अ० उक्तं यथा "कलौ भविष्यन्त्यथ भारतावनौ महीभुजो वाञ्छन्तोऽप्यनेकशः। शकास्तथैषामभिषेचनादिकं हितं यदोदीरितकालसाधितम्। धराधिभूर्भिन्नशकादिजातिजस्तदासनस्थोऽभिजनैर्नमस्कृतः। स्तुतः स राजाधिजनैः प्रतिष्ठितो न मन्त्रभेदाद्यभिषेचनोचितः। निहन्ति यो भूतलमण्डले शकान् सपक्षकोट्यजदलप्रमान् कलौ। स राजपुत्रः शककारको भवेत् नृपाधिराज्ये स्यु तथा शककर्त्तृ हा"। (तत्र शककारकस्य विक्रमादित्यस्य हननात् शालिवाहनस्य शककर्त्तृत्वम्) "युधिष्ठिरो विक्रमशालिवाहनौ नराधिनाथौ विजयाभिनन्दनः। इमेऽनु नागार्जुनमेदिनीविभुर्बलिः क्रमात् षट् शककारकाः कलौ"। तत्प्रवृत्तिकालांस्तत्राह "युधिष्ठिरात् वेदयुगाम्बराग्नयः (३०४४) कलम्बविश्वे (१३५) ऽम्बरखाष्टभूमयः १८०००; ततोऽयुतं १०००० लक्षचतुष्टयं क्रमात् धराद्रगष्टाविति (८२१) शाकवत्सराः। युधिष्ठिरोऽभूद्विहस्तिनापुरे तथोज्जयिन्यां पुरि विक्रमाह्वयः। शालेयभूमौऽथ ति शालिवाहनःसुचित्रकूटे विजयाभिनन्दनः। नागार्जुनो रोहितके क्षितौ बलिर्भविष्यतीन्द्रो भृगुकच्छपत्तने। कृतप्रवृत्तिस्तदनन्तरं भवेत्तदा भविष्यन्त्यवनीभृतोऽर्कतः"। अत्र युधिष्ठिरात् प्राक् कलौ शककर्त्तन्तराभावात् कलियुगारम्भकालादेव तस्य शककाल उक्तः वराहसंहितायां १३ अ० तु तद्राज्यावधित एव तच्छककाल इत्यभिप्रायेण "आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः (२५२६) शककालस्तस्य राज्ञश्च" तेन कलेः (५१८) वर्षेषु गतेषु युधिष्ठिरस्य राज्यप्रवृत्तिः। षट् कर्त्तृवत्सरसमष्टिश्च

| | |
|---|---|
| युधि० | ३०४४। |
| विक्र० | १३५ |
| शालि० | १८००० |
| विजया० | १०००० |
| नागा० | ४००००० |
| बलि० | ८२१ |
| | ३३२००० |

इति न कलिमानसंख्याविरोधः अतएव ज्योतिर्विदाभरणग्रन्थे ग्रन्थकृतैव "वर्षैः सिन्धुरदर्शनाम्बरगुणैर्याते कलौ सम्मितैः" इति कलियुगस्यैव ३०६८ वर्षेषु गतेषु ग्रन्थकरणमुक्तम्।

**शकट** पु० न० शक–अटन्। १यानभेदे (गाड़ि) अमरः। २असुराधिष्ठिते नन्दानयस्थे शकटविशेषे शकटभञ्जनः कृष्णः। ३द्विसहस्रपलपरिमाणे हेमच०। स्वल्पार्थे ङीप्। क्षुद्रशकटे स्वार्थे क। शकटिका तत्रैव स्त्री।

**शकटहन्** पु० शकटमसुराधिष्ठितशकटभेदं हतवान् हन–भूते क्विप्। श्रीकृष्णे तत्कथा हरिवं० ६२अ०।

**शकटाह्वा** स्त्री शकटाकारत्वात् तदाह्वा यस्याः। रोहिणीनक्षत्रे तस्याः शकटाकारचतुस्तारात्मकत्वेन तथात्वम्।

**शकन्धु** पु० ६त० शकन्ध्वा०। पररूपनिपातः शकानां कूपे।

**शकल** पु० न० शक–कलक्। १खण्डे २एकभागे। ३त्वचि ४वल्कले मेदि० ५शल्के (आँस) च न०।

**शकलिन्** पु० शकलं शल्कमस्यास्ति इनि। मत्स्ये अमरः।

**शकाब्द** पु० शककर्त्तृनृपसंबन्धी अब्दः। १शकप्रवर्त्तकनृपराज्यावधिवत्सरे २तत्संख्यायाञ्च।

**शकार** पु० "मदमूर्खताभिमानी दुष्कुलतैश्वर्य्यसंयुक्तः। सोऽयमनूढाभ्राता राज्ञः श्यालः शकार उद्दिष्टः" सा०द० उक्तलक्षणे १राज्ञोऽनूढभार्य्याभ्रातरि। श+स्वरूपे–कार। शस्वरूपे २वर्णे च।

**शकारि** पु० शकानां म्लेच्छजातिभेदानामरिः। विक्रमादित्ये

**शकुन** न० शक–उनन्। १शुभाशुभसूचकनिमित्ते–वामस्पन्दनकाकादिदर्शनादौ। दुःशकुनशब्दे ३६१पृ० दृश्यम् २पक्षिमात्रे ३पक्षिभेदे गृध्रे च पुंस्त्री० मेदि०।

**शकुनज्ञ** त्रि० शकुनं जानाति ज्ञा–क। १निमित्ताभिज्ञे २ज्येष्ठ्यां स्त्री त्रिका०।

**शकुनि** पु० शक–उनि। १पक्षिमात्रे अमरः। २चिल्लपक्षिणि हेमच०। ३सुबलराजपुत्रे दुर्य्योधनमातुले च। ३श्यामापक्षिणि स्त्री ङीप् राजनि०। ४ववादिषु करणभेदे पु० ५दुःसहनृपपुत्रे पु० मार्कण्डेयपु०। विकृतिनृपपुत्रभेदे पु० वह्निपु०।

**शकुनिप्रपा** स्त्री० ६त०। पक्षिणां पानीयशालायाम् हारा०।

**शकुन्त** पु० शक–उन्त। १पक्षिमात्रे। २भासपक्षिणि ३कीटभेदे च मेदि०।

**शकुन्तला** स्त्री० शकुन्तैः लायते ला–घञर्थे–क। मेनकागर्भजातायां विश्वामित्रसुतायाम् सा च जातमात्रा मात्रोत्सृष्टा शकुन्तलालिता पश्चात् कण्वमुनिना प्रतिपालिता दुष्मन्तनृपेण गान्धर्वविधिना व्यूढेति "निर्जने तु वने यस्मात् शकुन्तैः परिपालिता। शकुन्तलेति नामास्याः कृतं चापि ततो मया" भा० आ० ७२अ०। शकुन्तलामधिकृत्य कृतो ग्रन्थः। अण् आख्यायिकायां तस्य वा लुक्। कालिदासप्रणीते शकुन्तलाधिकारेण कृते २नाटकभेदे च अणोऽलुकि तु शाकुन्तल तत्रार्थे न०।